**सव्य** त्रि० सू-प्रेरणे यत् । १वामे २दक्षिणे च अमरः । ३प्रतिकूले हेमच० ४विष्णौ शब्दमा० ।

**सव्यभिचार** पु० सह व्यभिचारेण सहस्य सः । अनैकान्तिके दुष्टहेतुभेदे तल्लक्षणं तु "अनैकान्तिकः सव्यभिचारः" गौ०सू० "व्यभिचार एकत्राव्यवस्था सह व्यभिचारेण वर्त्तते इति सव्यभिचारः निदर्शनं नित्यः शब्दोऽस्पर्शत्वात्" वा०भा० । तत्त्वञ्च साध्यवन्मात्रवृत्त्यन्यत्वे सति साध्याभाववन्मात्रवृत्त्यन्यत्वम् चिन्ता० । सव्यभिचारपन्यदीधित्यादौ दृश्यम् ।

**सव्यसाचिन्** पु० सव्येन वामेनापि सचति सन्दधाति बाणं सच-णिनि । अर्जुने हेमच० "उभौ मे दक्षिणौ पाणी गाण्डीवस्य विकर्षणे । तेन देवमनुष्येषु सव्यसाचीति मां विदुः" भा०वि० ४४अ० ।

**सव्येष्ठ** पु० सव्ये तिष्ठति स्था-क अलुक्स० अम्बष्ठादि० षत्वम् । सारथौ हला० । [सारथौ अमरः ।

**सव्येष्ठृ** पु० सव्ये तिष्ठति स्था-ऋन् किच्च अलुक्स० षत्वम् ।

**सशल्या** स्त्री सह शल्येन । १नागदन्त्यां रत्नमा० २शल्ययुक्ते त्रि० । [त्रि० "न ससत्त्वेषु गर्त्तेष्वि"ति मनुः ।

**ससत्त्वा** स्त्री सह सत्त्वेन । १गर्भवत्यां स्त्रियां २प्राणियुक्ते

**स(श)सन** न०स(श)स-हिंसने ल्युट् । यज्ञार्थं पशुहनने अमरः

**सस्य** न०सस-यत् । १वृक्षादीनां फले अमरः २क्षेत्रगते धान्ये च हेमच० "सस्यं क्षेत्रं गतं प्रोक्तम्" स्मृतिः । "सस्यञ्च गृहमागतम्" चाणक्यः तालव्यादिरयमित्येके । ३शस्त्रे ४गुणे विश्वः ।

**सस्यक** पु० सस्यमिव कायति कै-क । "सस्यको नारिकेलान्तःसस्याभो मणिखड्गयोः" मेदि० उक्ते १मणिभेदे २खड्गे च ।

**सस्यमारिन्** पु० सस्यं मारयति मृ-णिच् णिनि । १मूषके राजनि० २सस्यघातके त्रि० । [अमरः ।

**सस्यसंवर** पु० सस्यं संवृणोति सम्+वृ-अच् । शालवृक्षे

**सस्यसंवरण** पु० सस्यं संवृणोति सम्+वृ-ल्युट् । अश्वकर्णवृक्षे राजनि० । [२धर्मयुक्ते त्रि० ।

**सस्वेदा** स्त्री सह स्वेदेन सहस्य सः । १दूषितकन्यायां शब्दर०

**सह** अव्य० सह-अच् । १साहित्ये अमरः २साकल्ये ३सादृश्ये ४यौगपद्ये ५विद्यमानत्वे ६समृद्धौ ७सम्बन्धे मेदि० । ८सामर्थ्ये शब्दमा० । सहशब्दार्थस्तु समभिव्याहृतक्रियाकालः स्वक्रियाकालीनक्रिया वा । तत्र गौणक्रियान्वयिनि तृतीया । पुत्रेण सहागता पिता ।

**सह** पु० सहते सह-अच् । १अग्रहायणमासे २भारादिसहिष्णौ त्रि० हेमच० ३गन्धलवणे ४बले पु०न० मेदि० ।

**सहकार** पु० सह युगपत् किरति सौरभम् दूरात् कॄ-अण् । अतिदूरगामिसौरभान्विते १आम्रे अमरः । भावे घञ् । २सहकर्मकरणे पु० ।

**सहकारिन्** त्रि० सह सम्भूय करोति कार्य्यं कृ-णिनि । हेतुभेदे स्वभिन्ने स्वकार्य्यकारके हेतौ । [हृगतौ च

**सहगमन** न०सह+गम-ल्युट् । १पत्यासहपत्न्यामरणे २स-

**सहचर** पु० सह चरति चर-अच् । १पीतझिण्ट्यां २नीलझिण्ट्याञ्च रत्नमा० । ३वयस्ये ४प्रतिबन्धके ५झिण्ट्यां हेमच० । ६सहाये ७अनुचरे त्रि० मेदि० "सहचरमधुहस्तन्यस्तचूताङ्कुरास्त्रः" कुमारः । स्त्रियां ङीप् ।

**सहचरी** स्त्री सह चरति चर-ट ङीप् । १पीतझिण्ट्यां २सख्यां जटा० । सह चरति धर्मम् चर-ट ङीप् । धर्मपत्न्यां हेमच० । [करणवृत्तित्वे ।

**सहचार** पु० सह+चर-घञ् । सामानाधिकरण्ये तदधि-

**सहज** पु० सह जायते जन-ड । १सहोदरे अमरः २निसर्गजे स्वभावसिद्धे च "सहजप्राकृतावपि" माघः । ३सहोत्थिते त्रि० मेदि० ज्योतिषोक्ते जन्मलग्नात् ४तृतीयस्थाने । तत्र भ्रातुः शुभादिचिन्तनात्तथात्वम् ।

**सहजमित्र** न० सहजं स्वभावसिद्धम् मित्रम् । स्वभावतो मित्रे भागिनेयादौ मिता० ।

कतिचित् सहजमित्राणि शुक्रनी०परि० उक्तानि यथा "केचित् स्वभावतोऽमित्रा मित्राणि सन्ति सर्वदा । माता मातृकुलं चैव पिता तत्पितरौ तथा । पितृपितृव्यात्मकन्या पत्नी तत्कुलमेव हि । पितृमात्रात्मभगिनी कन्यका सन्ततिस्तथा । प्रजापालो गुरुश्चैव मित्राणि सदजानि तु" । २विद्यादौ च "विद्या शौर्य्यञ्च दाक्ष्यं च बलं धैर्य्यञ्च पञ्चमम् । मित्राणि सहजान्याहुर्वर्त्तयन्ति हि तैर्बुधाः" शुक्रनीतिपरिशिष्टम् ।

**सहजारि** पु० सहजः स्वभावसिद्धः अरिः । सापत्नभ्रातृपितृव्यपुत्रादौ मिता० ।

शुक्रनीतिपरिशिष्टे अन्येऽप्युक्ता यथा

"स्वभावतो भवन्त्येतेऽरयो दुर्वृत्त एव च । ऋणकारी पिता शत्रुर्माता स्त्री व्यभिचारिणी । आत्मपितृभ्रातरश्च तत्स्त्रीपुत्राश्च शत्रवः । स्नुषा श्वश्रूः सपत्नी च ननान्दा यातरस्तथा । मूर्खः पुत्रः कुवैद्यश्चारकस्य पतिः प्रभुः । चण्डस्वण्डा प्रजा शत्रुर्दाता धनिकस्य